
{श्रीमात्रे नमः}



कार्तिकेय शर्म मुदिगोंड





{एकाक्षरगणपतिकवचं}

नमस्तस्मै गणेशाय सर्वविघ्नविनाशिने |
कार्यारंभेषु सर्वेषु पूजितो यः सुरैरपि ||

(पार्वत्युवाच):-

भगवन् देवदेवेश लोकानुग्रहकारकः |
इदानी श्रोतृमिच्छामि कवचं यत्प्रकाशितं ||
एकाक्षरस्य मंत्रस्य त्वया प्रीतेन चेतसा |
वदैतद्विधिवद्देव यदि ते वल्लभास्म्यहं ||

(ईश्वर उवाच) :-
शृणु देवि प्रवक्ष्यामि नाख्येयमपि ते ध्रुवं |
एकाक्षरस्य मंत्रस्य कवचं सर्वकामदं ||

karthikeya mudigonda

यस्य स्मरणमात्रेण न विघ्नाः प्रभवंति हि |
त्रिकालमेककालं वा ये पठंति सदा नराः ||
तेषां क्वापि भयं नास्ति संग्रामे संकटे गिरौ |
भूतवेतालरक्षोभिर्ग्रहैश्चापि न बाध्यते ||
इदं कवचमज्ञात्वा यो जपेद् गणनायकं |
न च सिद्धिमाप्नोति मूढो वर्षशतैरपि ||
अघोरो मे यथा मंत्रो मंत्राणामुत्तमोत्तमः |
तथेदं कवचं देवि दुर्लभं भुवि मानवैः ||
गोपनीयं प्रयत्नेन नाज्येयं यस्य कस्यचित् |
तव प्रीत्या महेशानि कवचं कथ्यतेऽद्भुतं ||

अस्यश्री एकाक्षर गणपति कवचस्य| गणक ऋषिः
त्रिष्टुप् छंदः| गणपतिर्देवता| गं बीजं| ॐ शक्तिः
नमः कीलकं| जपेविनियोगः

गां- अंगुष्ठाभ्यां नमः

गीं- तर्जनीभ्यां नमः

गूं- मध्यमाभ्यां नमः

गैं- अनामिकाभ्यां नमः

गौं- कनिष्ठिकाभ्यां नमः

गः- करतलकरपृष्ठाभ्यां नमः

गां- हृदयायनमः

गीं- शिरसे स्वाहा

गूं- शिखायै वषट्

गैं- कवचाय हुं

गौं- नेत्रत्रयाय वौषट्

गः- अस्त्राय फट्

भर्भुवस्सुवरोंमिति दिग्बंधः

ध्यानं:-

रक्तांभोजस्वरूपं लसदरुणसरोजाधिरूढं त्रिनेत्रं

पाशंचैवांकुशं वा वरदमभयदं बाहुभिर्धारयंतं !

शक्त्या युक्तं गजास्यं पृथुतरजठरं

नागयज्ञोपवीतं

देवंचंद्रार्धचूडं सकलभयहरं विघ्नराजं नमामि!!

{ पंच पूज }

लं पृध्वी तत्वात्मने गंधं परिकल्पयामि.

(समर्पयामि)

हं आकाश तत्वात्मने पुष्पं परिकल्पयामि.

(समर्पयामि)

यं वायः तत्वात्मने धूपं परिकल्पयामि.

(आग्रपयामि)

रं तेजः तत्वात्मने दीपं परिकल्पयामि.

(दर्शयामि)

वं अमृत तत्वात्मने अमृनैवेद्यं परिकल्पयामि.

(निवेदयामि)

सं सर्वतत्वात्मने तांबूलादि सर्व उपचार पूजां परिकल्पयामि (समर्पयामि)

{ गुरुध्यानं }

गुरुब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः |
गुरुस्साक्षात् परब्रह्म तस्यै श्री गुरवे नमः ||

गणेशो मे शिरः पातु भालं पातु गजाननः |
नेत्रे गणपतिः पातु गजकर्णः श्रुती मम ||
कपोलौ गणनाथस्तु घ्राणं गंधर्वपूजितः |
मुखं मे सुमुखः पातु चिबुकं गिरिजासुतः ||
जिह्वां पातु गणक्रीडो दंतान् रक्षतु दुर्मुखः |
वाचं विनायकः पातु कष्टं पातु महोत्कटः ||
स्कंधौ पातु गजस्कंधो बाहू मे विघ्ननाशनः |
हस्तौ रक्षतु हेरंबो वक्षः पातु महाबलः ||

हृदयं मे गणपतिरुदरं मे महोदरः |
नाभि गंभीरहृदयः पृष्ठं पातु सुरप्रियः ||
कटिं मे विकटः पातु गुह्यं मे गुहपूजितः |
ऊरु मे पातु कौमारं जानुनी च गणाधिपः ||
जंघे गजप्रदः पातु गुल्फौ मे धूर्जटिप्रियः |
चरणौ दुर्जयः पातुर्सांगं गणनायकः ||
आमोदो मेऽग्रतः पातु प्रमोदः पातु पृष्ठतः |
दक्षिणे पातु सिद्धिशो वामे विघ्नधरार्चितः ||
प्राच्यां रक्षतु मां नित्यं चिंतामणिविनायकः |
आग्नेयां वक्रतुंडो मे दक्षिणस्यामुमासुतः ||
नैॠत्यां सर्वविघ्नेशः पातु नित्यं गणेश्वरः |
प्रतीच्यां सिद्धिदः पातु वायव्यां गजकर्णकः ||
कौबेर्यां सर्वसिद्धिशः ईशान्यामीशनंदनः |
ऊर्ध्वं विनायकः पातु अधो मूषकवाहनः ||
दिवा गोक्षीरधवलः पातु नित्यं गजाननः |

रात्रौ पातु गणक्रीडः संध्योः सुरवंदितः ॥
पाशांकुशाभयकरः सर्वतः पातु मां सदा ।
ग्रहभूतपिशाचेभ्यः पातु नित्यं गजाननः ॥
सत्वं रजस्तमो वाचं बुद्धिं ज्ञानं स्मृतिं दयां ।
धर्मचतुर्विधं लक्ष्मीं लज्जां कीर्तिं कुलं वपुः ॥
धनं धान्यं गृहं दारान् पौत्रान् सखींस्तथा ।
एकदंतोऽवतु श्रीमान् सर्वतः शंकरात्मजः ॥
सिद्धिदं कीर्तिदं देवि प्रपठेन्नियतः शुचिः ।
एककालं द्विकालं वापि भक्तिमान्यत्नतः ॥
न तस्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यते ।
सर्वपापविनिर्मुक्तो जायते भुवि मानवः ॥
यं यं कामयते नित्यं सुदुर्लभमनोरथं ।
तं तं प्राप्नोति सकलं षण्मासान्नात्र संशयः ॥
मोहनस्तंभनाकर्षमारणोच्चाटनं वशं ।
स्मरणादेव जायंते नात्र कार्या विचारणा ॥

सर्वविघ्नहरं देवं ग्रहपीडानिवारणं |
सर्वशत्रुक्षयकरं सर्वापत्तिनिवारणं ||
धृत्वेदं कवचं देवि यो जपेन्मंत्रमुत्तमं |
न वाच्यते स विघ्नौघैः कदाचिदपि कुत्रचित् ||
भूर्जे लिखित्वा विधिवद्धारयेद्यो नरः शुचिः |
एकबाहो शिरः कंठे पूजयित्वा गणाधिपं ||
एकाक्षरस्य मंत्रस्य कवचं देवि दुर्लभं |
यो धारयेन्महेशानि न विघ्नैरभिभूयते ||
गणेशहृदयं नाम कवचं सर्वसिद्धिदं |
पठेद्वा पाठयेद्वापि तस्य सिद्धिः करे स्थिता ||
न प्रकाश्यं महेशानि कवचं यत्र कुत्रचित् |
दातव्यं भक्तियुक्ताय गुरुदेवपराय च ||

{इति श्रीरुद्रयामले एकाक्षरगणपतिकवचं संपूर्ण}

karthikeya mudigonda